# Shri Dhanvantarinavakam

# श्रीधन्वन्तरीनवकम्

## Document Information

Text title : dhanvantarInavakam

File name : dhanvantarInavakam.itx

Category : vishhnu, vAsudevanElayath, nava

Location : doc_vishhnu

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# श्रीधन्वन्तरीनवकम्

दैवासुरैर्भावगणैरजस्रं
प्रमथ्यमाने जनजीविताब्धौ ।
समुद्गतं नूतनकालकूटं
प्रतारकं मोहनबाह्यरूपम् ॥ १॥

लोकस्तदासेवननष्टबोधः
प्रपद्यते हन्त महाविपत्तिम् ।
त्रातुं न चेष्टे वत नीलकण्ठः
स्वयं कृतानर्थकदर्थितं तम् ॥ २॥

धन्वन्तरं श्रीभगवन् प्रसन्न-
स्वयं सन्निधेहि द्रुतमार्तबन्धो ।
पश्यात्र लोकान् विषवेगतप्तान्
नितान्तरुग्णान् करणत्रयेऽपि ॥ ३॥

केचिन्महामोहवशं प्रयाताः
संशेरते देव! परेतकल्पाः ।
उन्मत्तचित्ताः परितो भ्रमन्ति
जगद्द्रुहश्चासुरशक्तयोऽन्ये ॥ ४॥

मन्दस्मिते सुन्दरशातकुम्भ-
कुम्भे तथा लोलविलोचनान्ते ।
नवामृतं, किञ्च करे जाळूकां
समाददानो भगवन्नुपेहि ॥ ५॥

विभो समाश्वासयतावदुद्य-
न्मृदुस्मितार्द्रैर्मधुरावलोकैः ।
विषोग्रवेगोत्थरुजासहस्रै-
र्निपीडितं विश्वमिदं कृपात्मन्! ॥ ६॥

करस्थयादिव्यजळूकयाशु
लोकस्य दूरीकुरु दुष्टरक्तम् ।
हरे, सिराः पूरय हेमकुम्भ-
निर्यत्सुधात्वादजशुद्धरक्तैः ॥ ७॥

उल्लाधतालाभसुहृष्टचित्तो
लोकः समुत्तिष्ठतु शुद्धसत्वः ।
देवी च सम्पद्विजयं प्रयातु
मानुष्यके त्वत्करुणाकटाक्षैः ॥ ८॥

भिषग्वरैर्नित्यमुपास्यमान-
पादाब्ज, धन्वन्तरिरूप, विष्णो ।
नारायणारोग्यसुखप्रदायि-
न्नपूर्ववैद्याय नमोऽस्तु तुभ्यम् ॥ ९॥

इति श्रीवासुदेवन् एलयथेन विरचितं श्रीधन्वन्तरीनवकं सम्पूर्णम् ।

*Shri Dhanvantarinavakam*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*